**CLASS : 12th (Sr. Secondary)** **Code No. 253**

**Series : SS/Annual-2023**

*रोल न०* | | | | | | | | | | |

# उत्तर मध्यमा सह वरिष्ठ माध्यमिक परीक्षा संस्कृत साहित्य वेद सिद्धान्त (परम्परागत संस्कृत विद्यापीठ)

**Sub Code : 1204/SSA**

(Only for Fresh/Re-appear/Improvement/Additional Candidates)

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **7** तथा प्रश्न **6** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें। रोल नं० के अतिरिक्त प्रश्न-पत्र पर अन्य कुछ भी न लिखें और वैकल्पिक प्रश्नों के उत्तरों पर किसी प्रकार का निशान न लगाएँ।*
- *कृपया प्रश्नों के उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देश :- सर्वे प्रश्नाः समाधेयाः।*

**1.** (क) शिवराजविजयग्रन्थस्य कथासारं लिखत। $3 \times 6 = 18$

**अथवा**

शिवराजविजयग्रन्थस्य द्वितीयनिःश्वासस्य सारं लिखत।

(ख) अम्बिकादत्तस्य जीवनपरिचयं लिखत।

**अथवा**

शिवराजविजयग्रन्थस्य पात्राणां परिचयं लिखत।

(ग) श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्य महत्त्वं प्रतिपादयत।

**अथवा**

श्रीमद्भगवद्गीतायाः अष्टमाध्यायस्य सारं लिखत।

**2.** अधोलिखितगद्यांशस्य सप्रसङ्गं व्याख्या कार्या - $1 \times 6 = 6$

तेषु च अफजलखान-दमन-विषयकवार्तामारिप्सुष्वेव कश्चिद् नेत्रहस्तः प्रतीहारः प्रविश्य, वेत्रं कक्ष्ये संस्थाप्य शिरो नमयित्वा, अञ्जलिं बद्ध्वा न्यवीविदत्-प्रभो ! श्रीमान् गौरसिंहो दिदृक्षतेऽत्र भवन्तम्।

**अथवा**

मैवं भो ! श्व एव आहव-क्रीडास्माकं भविष्यति, तत् श्रूयते सन्धिवार्ता-व्याजेन शिव एकत आकारयिष्यते, यावच्च स स्वसेनामवहाय एकाकी अस्मत्स्वामिना सहाऽऽलपितुमेकान्तस्थाने यास्यति, तावद् वयं श्येना इव शकुनिमण्डले महाराष्ट्रसेनायां, छिन्धि, भिन्धि इति कृत्वा युगपदेव पतिष्यामः, वसन्त-वाताहत-नीरसच्छदानिव च क्षणेन विद्रावयिष्यामः।

**3.** अधोलिखितश्लोकेषु ***पञ्चानां*** सप्रसंगं व्याख्या कार्या – $4 \times 5 = 20$

(क) अधिभूतं क्षरोभावः पुरुषश्चाऽधिदैवतम्।

अधियज्ञोऽहमेवात्र देहे देह तां वर।।

(ख) यं यं वाऽपिस्मरन्भावं त्यज्यत्यन्ते कलेवरम्।

तं तमेवैति कौन्तेय सदा तद्भावभावितः।।

(ग) अभ्यासयोगयुक्तेन चेतसा नाऽन्यगामिना।

परमं पुरुषं दिव्यं याति पार्थाऽनुचिन्तयन्।।

(घ) ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।

यः प्रयाति त्यजन्देहं स याति परमां गतिम्।।

(ङ) सहस्त्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदुः।

रात्रिं युगसहस्त्रान्तां तेऽहोरात्रविदो जनाः।।

(च) यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः।

प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ।।

(छ) शुक्लकृष्णे गते ह्येते जगतः शाश्वते मते।

एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः।।

(ज) नैते सृती पार्थ जानन् योगीमुञ्चतिकश्चन।

तस्मात्सर्वेषु कालेषु योगयुक्तो भवाऽर्जुन।।

**4.** निम्नांकित गद्यांशं पठित्वा एकपदेन उत्तरं दीयताम् - $2 \times 5 = 10$

''क्षम्यतामेष आगच्छामि' आगत्य च निखिलं निवेदयामि।'' इति कथयन् द्वादशवर्षेण केनापि भिक्षुबटुनाऽनुगम्यमानः, कोऽपि काषायवासाः धृततुम्बीपात्रः, भस्मच्छुरितललाटः, रुद्राक्ष-मालिकासनाथित-कण्ठः भव्यमूर्त्तिः सन्यासी दृष्टः।

(क) 'क्षम्यतामेष आगच्छामि' इति कः वदति ?

(ख) भिक्षुबटुः कतिवर्षीयोऽस्ति ?

(ग) बटोः वस्त्राणि कीदृशानि सन्ति ?

(घ) बटोः ललाटः कीदृशः अस्ति ?

(ङ) अस्य गद्यांशस्य समुचितशीर्षकं लिखत।

**5.** निम्नांकितपद्यं पठित्वा एकपदेन उत्तरत – $2 \times 5 = 10$

अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते।
भूतभावोद्भवकरो विसर्गः कर्म संज्ञितम्।।

(क) उपर्युक्तश्लोकस्य वक्ता कः ? श्रोता च कः ?

(ख) कस्य स्वभावोऽध्यात्ममुच्यते ?

(ग) 'विसर्गः' इति पदस्य कोऽर्थः ?

(घ) श्लोकोऽयं कस्य ग्रन्थस्य कस्याध्यायस्य चास्ति ?

(ङ) उपरोक्तपद्ये अक्षरमिति पदं कस्य विशेषणम् ?

## (वस्तुनिष्ठप्रश्नाः) $1 \times 16 = 16$

**6.** अधोलिखितप्रश्नानाम् उत्तरं विकल्पेषु ***शुद्धं*** विकल्पं चित्वा देयम् –

(i) अन्धकारे पादध्वनिः कः श्रुतवान् ?

(क) दौवारिकः (ख) भिक्षुबटुः

(ग) गौरसिंहः (घ) औरंगजेबः

(ii) भिक्षुबटुः कतिवर्षीयः अस्ति ?

(क) दशवर्षीयः (ख) द्वादशवर्षीयः

(ग) पञ्चदशवर्षीयः (घ) षोडशवर्षीयः

(iii) संन्यासी वेशधारी क आसीत् ?

(क) गौरसिंहः (ख) रघुवीरसिंह

(ग) अफजल खां (घ) शहाबुद्दीनः

(iv) शिवाजीप्रसादे कैस्सह उपविष्ट आसीत् ?

(क) मन्त्रिभिः (ख) मित्रैः

(ग) जनैः (घ) खगैः

(v) अफजलखानः कः आसीत् ?

(क) विजयपुराधीश्वरस्य सेनानी (ख) राज्यस्य मन्त्री

(ग) राज्यस्य सभापतिः (घ) राज्यस्य गुप्तचरः

(vi) माल्यश्रीकः क आसीत् ?

(क) शिववीरस्य भ्राता (ख) शिववीरस्य पिता

(ग) शिववीरस्य मित्रम् (घ) शिववीरस्य गुरुः

(vii) प्रतापदुर्गदौवारिकः अन्धकारे किं श्रुतवान् ?

(क) शङ्खध्वनिम् (ख) पादध्वनिम्

(ग) द्विरेफध्वनिम् (घ) काकध्वनिम्

(viii) 'कौन्तेय' इति कस्य अपरनाम अस्ति ?

(क) भीष्मस्य (ख) श्रीकृष्णस्य

(ग) अर्जुनस्य (घ) दुर्योधनस्य

(ix) गीतायाः अष्टमाध्यायस्य नाम किम् ?

(क) कर्मयोगः (ख) भक्तियोगः

(ग) तारकब्रह्मयोग (घ) सांख्ययोगः

(x) 'तस्मात्सर्वेषु कालेषुमामनुस्मर' इति कः उक्तवान् ?

(क) अर्जुनः (ख) युधिष्ठिरः

(ग) भीष्मः (घ) श्रीकृष्णः

(xi) योगीपुरुषः किं प्राप्नोति ?

(क) उच्चपदम् (ख) धनपदम्

(ग) परमपदम् (घ) यशोपदम्

(xii) शिवराजविजयस्य रचयिता कः ?

(क) कालिदासः (ख) बाणभट्टः

(ग) अम्बिकादत्तः (घ) श्रीहर्षः

(xiii) अग्निः किंवर्णीयो भवति ?

(क) कृष्णः (ख) रक्तः

(ग) शुक्लः (घ) पीतः

(xiv) ब्रह्मविदो जनाः कुत्र गच्छन्ति ?

(क) परमधाम (ख) स्वर्गम्

(ग) गोधाम (घ) नरकम्

(xv) 'पार्थ' इति सम्बोधनं कस्मै प्रयुक्तम् ?

(क) अर्जुनाय (ख) कृष्णाय

(ग) संजयाय (घ) भीष्माय

(xvi) श्रीमद्भगवद्गीतायाः अष्टमेऽध्याये कतिश्लोकाः सन्ति ?

(क) अष्टाविंशति (ख) त्रिंशत्

(ग) पञ्चविंशति (घ) पञ्चत्रिंशत्